**रजस्** न०रन्ज-असुन् नलोपः। १कुसुमे अमरः। २पुष्परेणौ ३परागे ४धूलौ मेदि० सांख्योक्ते चलनादियुते ५प्रकृतिगुणभेदे च "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च" रजः" सां० का० । "सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्येते तदिदमुक्तमुपष्टम्भकं रज इति। कस्मादित्यत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्" त०कौ०। ६पृथिव्यां स्त्री ङीप् निघण्टुः।

**रजस्वल** त्रि० रजोऽस्त्यस्य वलच्। १रजोयुक्ते २महिषे पुंस्त्री० मेदि० स्त्रियां ङीष्। आर्त्तववत्यां स्त्रियां स्त्री टाप् अमरः।

**रजोरस** न० रजस इव रसोऽनुभवोऽस्य। अन्धकारे त्रि०।

**रजोवल** न०रज इव वलति। वल-अच्। अन्धकारे त्रिका०

**रज्जु** स्त्री सृज-उ नि०। १बन्धनसाधने दामनि अमरः (दड़ि) २वेण्याञ्च मेदि०।

**रञ्जक** न० रञ्जयति रन्ज-णिच्-ण्वुल्। १हिङ्गुले राजनि० २प्रीतिकारके त्रि०। ३काम्पिल्लवृक्षे पु० (ङङ्करमचा) राजनि०।

**रञ्जन** न० रज्यतेऽनेन रन्ज-करणे ल्युट्। १रक्तचन्दने २हिङ्गुले ३मुञ्जतृणे राजनि० ४मञ्जिष्ठायां ५नील्यां ६गणेरोचनिकायां (कमलागुड़ि) स्त्री मेदि० ङीप्। ६शेफालिकायां शब्दच०। ७हरिद्रायां दर्पपटयाञ्च स्त्री राजनि० ङीप्। भावे ल्युट्। ८रागे। णिच् कर्त्तरि ल्यु। १०रागजनके त्रि०। संज्ञायां कन्। ११कटफले पु०राजनि०

**रट** भाषणे भ्वा० पर० सक० सेट्। रटति अराटीत् अरटीत् रेटतुः "माघे मासि रटन्त्यापः" मल०त०।

**रटन्ती** स्त्री रट-बा०भश् ङीप्। "माघे मास्यसिते पक्षे रटन्त्याख्या चतुर्दशी। तस्यां प्रदोषसमये पूजयेत् मुण्डमालिनीम्" इत्युक्तायां माघकृष्णचतुर्दश्याम्। [रेठतुः।

**रठ** भाषणे भ्वा० पर० सक० सेट्। रठति अराठीत् अरठीत्

**रण** गतौ भ्वा० पर० सक०सेट्। रणति अराणीत् अरणीत् रेणतुः। घटादि०। रणयति। [रेणतुः।

**रण** रवे भ्वा० पर० अक० सेट्। रणति अराणीत् अरणीत्

**रण** पुंन० अर्द्धर्चा० रण-"क्वणिरणयोः"वार्त्ति० अप्। १युद्धे अमरः। भावे अप्। २शब्दे ३क्वणे पु० मेदि० ४गतौ च पु० शब्दर०।

**रणरणक** पु० रणः शब्दस्तत्प्रकारः प्रकारे द्वित्वम् ततः संज्ञायां कन्। १उद्वेगे हेमच० २अतिशये च।

**रणसङ्कुल** न० रणमेव सङ्कुलम्। तुमुलयुद्धे अमरः।

**रण्ड** पु० रम-ड तस्य नेत्त्वम्। १धूर्त्ते २विफले कर्ण्णाङ्कविशिष्टतया ३छिन्नावयवे त्रि०संक्षिप्तसारः। ४मूषिकपर्ण्याम् स्त्री अमरः। ५विधवायाञ्च स्त्री। स्वार्थे क। अफलवृक्षादौ शब्दच०।

**रण्डाश्रमिन्** पु० रण्डः विफलः प्रजाहीनत्वात् आश्रमः अस्त्यस्य इनि। "चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि। स्त्रिया वियुज्यते कश्चित् स तु रण्डाश्रमी मतः" इत्युक्तवयसि स्त्रीवियुक्ते पुरुषे।

**रत** न० रम-भावे क्त। १रमणे स्त्रीपुंसयोः सङ्गमे मैथुने अमरः।२गुह्ये च मेदि०। कर्त्तरि क्त। ३अनुरक्ते त्रि०।

**रतक्रिया** स्त्री रतये रतिरूपो वा क्रिया व्यापारः। स्त्रीपुंससङ्गमसाध्ये मैथुने।

**रतगुरु** पु० ७त०। पत्यौ त्रिका०। [कामदेवपत्न्यां च मेदि०।

**रति** स्त्री रम-क्तिन्। १रागे २गुह्ये ३रमणे ४तदधिष्ठात्र्यां

**रतिपति** पु० ६त०। कन्दर्पे अमरः। रतिकान्तादयोऽप्यत्र।

**रतिप्रिय** पु०६त०। १कामदेवे शब्दर०। ६ब०।२रमणप्रिये त्रि०

**रतिबन्ध** पु० रतौ बन्धः। रतिमञ्जर्य्युक्ते षोड़शप्रकारे रमणबन्धभेदे "न भवन्ति यदा नार्य्यस्तुष्टा बाह्यरतेन ताः। नानाविधैस्तदा बन्धै रन्तव्या कामिभिः स्त्रियः। पद्मासनो १ नागपाशो२ लतावेष्टो३ऽर्द्धसंपुटम् ४। कुलिशं५ सुन्दरं६ चैव तथा केशर७ एव च। हिल्लोलो८ नरसिंहो९ऽपि विपरीत१० स्तथाऽपरः। ११क्षुब्धो वै धेनुक१२ श्चैवमुत्कण्ठ१३ स्तु ततः परम्। सिंहासनो१४ रतिनागो१५ विद्याधर१६ स्तु षोड़श:" रतिमञ्जरी। तत्तल्लक्षणं तत्र दृश्यम्। [चिह्ने च जटा०।

**रतिमन्दिर** न० ६त०। १रतिगृहे २स्त्रीणामसाधारण-

**रतिरमण** पु० रतिं रमयति रम-णिच्-ल्यु। कामदेवे।

**रतिलक्ष** न० रतेर्लक्षं पदम्। मैथुने हारा०।

**रतिसत्वरा** स्त्री रतिं सत्वरयति सत्वरा+करोत्यर्थे णिच्-अण्। (पिड़िङ्ग) शाके शब्दच०।

**रत्न** न० रमतेऽत्र रम-न तान्तादेशः। १माणिक्यादिप्रस्तरे अमरः। २स्वस्वजातिषु श्रेष्ठे मेदि० ३माणिक्ये ४हीरके च राजनि०। तद्भेदादिकं हे०प०दा०ख० उक्तं यथा "रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन। यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः। द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति। इह तु-